एवं यथासम्भवं सर्वेषां ग्रहाणामन्तर्दशाः कार्याः। दशाविभागक्रमेणैवान्तर्दशाविभागकल्पना कर्तव्या। विदशोपदशाविभागोऽप्येवमेव॥

भावार्थः- जितने ग्रहों का अन्तर्दशाधिकार प्राप्त हो, दशाधिप सहित उन ग्रहों के भाग लिखकर सभी का समच्छेद कर छेद (हर) का त्याग करें। और अंशों का योग वर्षादि दशा का भाजक एवं प्रत्येक अंश अलग-अलग गुणक होते हैं। इस प्रकार दशामान को अलग-अलग गुणक से गुणा कर भाजक से भाग देने पर अन्तर्दशा होती है।

उदाहरण- लग्न की दशा में क्रमानुसार अन्तर्दशा (लग्न १, सूर्य $\frac{१}{३}$, गुरु $\frac{१}{४}$) पाचक हैं। अर्थात् न्यास : $\frac{१}{१}, \frac{१}{३}, \frac{१}{४}$ समच्छेद करने से $\frac{१२}{१२}, \frac{४}{१२}, \frac{३}{१२}$ क्रमानुसार गुणक १२, ४, ३। गुणकों का योग = १२+४+३=१९ (हर)।

लग्न की दशा वर्षादि १०।५।२०।१५।० को लग्न के गुणकांक १२ से गुणा करने पर १२०।६०।२४०।१८०।० हुआ। इसमें हर (१९) का भाग देने पर लब्धि वर्षादि ६।६।४१।१२।३८ आया, जो लग्न की दशा में लग्न की अन्तर्दशा हुई। पुनः दशा वर्षादि (१०।५।२०।१५।०) को रवि ग्रह के गुणकांक ४ से गुणा करने पर ४०।२०।८०।६०।० हुआ। इसमें हर (१९) से भाग देने से लब्धि वर्षादि २।२।१३।४४।१३ आया जो लग्न की दशा में सूर्य की अर्न्तदशा हुई। पुनः दशा वर्षादि (१०।५।२०।१५।०) को गुरु ग्रह के गुणकांक ३ से गुणा करने पर ३०।१५।६०।४५।० हुआ। इसमें हर (१९) का भाग देने से लब्धि वर्षादि १।६।२५।१८।९ आया, जो लग्न की दशा में गुरु की अन्तर्दशा हुई। अन्तर्दशा का योग लग्न की दशा के समान है अर्थात् लग्नान्तर्दशा वर्षादि ६।६।४१।१२।३८ + सूर्यान्तर्दशा वर्षादि २।२।१३।४४।१३ + गुर्वन्तर्दशा वर्षादि १।६।२५।१८।०९ = १०।५।२०।१५।० = लग्न की दशा वर्षादि।

विशेष- दशाधिप से १।५।९।७।४।८ इन स्थानों में रहने वाले ग्रह अन्तर्दशाधिकारी होते हैं।

## अन्तर्दशा साधन —

भागाः सदृशच्छेदैर्विवर्जिताः संयुता दशाच्छेदाः।
प्रत्यंशा गुणकाराः पृथक् पृथक् चान्तर्दशास्ताः॥
"भागादौ तु सदा रूपं विन्यस्य सदृशीकृतम्।
सर्वच्छेदांशसंयोगैर्विदध्याद्दन्तर्दशा फलम्॥
रूपस्थानगतैरंशैर्यल्लब्धं सङ्गुणीकृतम्।
दशा ह्यान्तर्दशा प्रोक्ता नित्यं यवनसूरिभिः॥

दशापतेरेकक्षेत्रर्क्षे त्र्यंशं त्रिकोणयोरित्यादि दर्शितस्थानेषु यो ग्रहो भवति तत्स्थानोक्तसंख्या भागाः रूपस्याधः स्थाप्याः दशापतेरादावेव रूपं परिकल्पयेत्। ततः परस्परच्छेदहता कार्याः, एकैकं प्रत्येकेन छेदेन गुणयेत्। एवं कृते भागाः सदृशच्छेदा भवन्ति। उपरिगता राशयो दशापिण्डस्य पृथक् पृथक् गुणकारा भवन्ति। एकीकृताश्च सर्वेषां एक एव भागहार एव गुणितविभक्ता ग्रहदत्तायुः १।१।१।१।१ पिण्डात् पृथक् पृथक् अन्तर्दशा लभ्यते। तद्यथा-१।२।३।६।४ एते भागाः परस्परच्छेदेन हताः सांशाः कार्या यावत्सर्वं एवं समच्छेदा भवन्ति कृता एवंविधा १६८।८४।५६।२४।४२ जाताः एते एव संयुक्ता जाता ६८।१६८।१६८।१६८।१६८।३६४ छेदाः ग्रहदत्तायुः पिण्डं, वर्षमासदिवसघटिकान्तं संस्थाप्य पृथक् पृथक् गुणकारेण गुणयेत् घटिकानां षष्ट्या भा-गमपहृत्य दिवसेषु क्षिपेत, दिवसानां त्रिंशता भागमपहृत्य-मासेषु क्षिपेत् मासानां द्वादशभिर्भागमपहृत्य वर्षेषु क्षिपेत्, अवशेषं सर्वं स्थाप्य ततो वर्षस्थानेषु भागहारेण ३६४ भागमपहृत्यावाप्तं वर्षाणि। शेषं द्वादशभिः सङ्गुण्यावस्थितान् मासान संयोज्य छेदेन विभज्य अवाप्तं मासाः वर्षाणामधः स्थाप्याः। तदेवं शेषं त्रिंशता संगुण्यावस्थितानि दिनानि संयोज्य छेदेन विभज्यावाप्तं घटिका दिवसानामधः स्थाप्याः

P.T.O

वस्तुनिष्ठप्रश्नाः

शास्त्री-I, II

Date 07-08-20
Page 3

(1) चतुःशालमध्ये देवस्थानं कस्यां दिशि भवेत् ?

उत्तरम्- ईशानकोणे।

(2) पूर्वस्यां श्रीगृहं प्रोक्तमाग्नेय्यां स्यान्महानसम्।
शयनं दक्षिणायाञ्च नैर्ऋत्यामायुधाश्रयम्॥
भोजनं पश्चिमायां च वायव्यां धनसञ्चयम्।
उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम्॥
कुत्रास्ति वाक्यमिदम् ?

उत्तरम्- शास्त्रान्तरे।

(3) वास्तोरुत्तरस्यां दिशि सति जलाशये किम्फलम् ?

उत्तरम्- धनवृद्धिः।

(4) शय्यानुवंशविन्यस्ता तुला स्यात् कुटुम्बिनः।
कर्तुः शय्या स्वतानस्था नागदन्ताः क्षयावहाः॥
इति कस्य वचनम् ?

उत्तरम्- विश्वकर्मणः।

(5) ज्येष्ठस्य कर्मसिद्ध्यर्थं नव पञ्चगुणाः सुराः।
यतस्तत्र वसन्त्येते मूर्धाद्यङ्गेषु कृत्स्नशः॥
वाक्यमिदं कुत्रास्ति ?

उत्तरम्- तन्त्रान्तरे।

(6) द्वारदेशे कं देवं स्थापयेत् ?

उत्तरम्- उमापतिम्।

(7) बलदेवः कुत्र भवेत् ?

उत्तरम्- दक्षिणस्यां दिशि।

(8) बाह्याभ्यन्तरदेवांस्तु वास्तुमध्ये यथास्थितान्।
तथा च सर्वान् सम्पूज्य विधिनैव पुरोहितः॥
इति वाक्यम कुत्राऽस्ति ?

उत्तरम्- अन्यतन्त्रे।

(9) वेतसः वृक्षस्य कस्यां दिशि जलं लभ्यते ?

उत्तरम्- पश्चिमायां दिशि।

P.T.O

(10) पश्चिमायां दिशि कियद्भिर्हस्तैः लभ्यते जलम् ?
उत्तरम्- सार्धपुरुषप्रमाणैर्नीचैः।
(11) कियदङ्गुलपरिमितं पुरुषप्रमाणम् ?
उत्तरम्- विंशत्यधिकशताङ्गुलप्रमाणम।
(12) निर्जले वेतसं दृष्ट्वा तस्मादू हस्तादपि त्रयम्।
पश्चिमायां दिशि ज्ञेयमधः सार्धेन वै जलम् ॥
नरोऽत्र जविटह्निगुणा चाङ्गुलानां प्रकीर्तितः।
तत्र चाखाडर्कपुरुषमेकः पाण्डुरवर्णकः ॥
मृत्पीता पुरुषेऽश्च पाषाणोऽधस्ततो जलम्।
शिरा पश्चिमदिक्स्थाऽत्र वहतीति विनिर्दिशेत् ॥
इति कस्य वचनम्।
उत्तरम्- सारस्वतस्य।
(13) जम्बूवृक्षस्य कस्यां दिशि भवति जलम् ?
उत्तरम्- उत्तरस्यां दिशि।
(14) वृक्षात् कियद्धस्तपरिमितं दूरं भवति जलस्रोतः?
उत्तरम्- त्रिहस्तपरिमितं दूरं।
(15) जम्बूवृक्षस्य कस्यां दिशि सति वल्मीके जलं भवति ?
उत्तरम्- पूर्वस्याम्।
(16) वल्मीकात् कस्यां दिशि कियद् दूरं भवति जलम् ?
उत्तरम्- वल्मीकात् दक्षिणस्यां दिशि त्रिहस्तपरिमिते दूरे।
(17) उदुम्बरवृक्षस्य कस्यां दिशो जलं लभ्यते ?
उत्तरम्- पश्चिमायां दिशि।
(18) अर्जुनवृक्षस्य कियद् दूरं भवेत् वल्मीकः?
उत्तरम् - उत्तरस्यां दिशि त्रिहस्तपरिमितं दूरम्।
(19) बदर्यां कस्यां दिशि वल्मीको भवेत्तदा जलं लभ्यते ?
उत्तरम्- पूर्वस्यां दिशि।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०आ०सं०महावि० कुचसेना, पूर्णियाँ।